३ – तिङ्प्रत्ययानां सिद्धिः

प्रथमे द्वितीये च पाठयोः अङ्गं कथं निर्मीयते इति अस्माभिः अवलोकितम् | अधुना अङ्गं निर्मितम् | जय, नय, भव, हर, तर, गाय, शोभ, कर्ष, लज, यत, वद, मूर्च्छ, वन्द इत्यादीनि भ्वादिगणीय–अङ्गानि साधितानि | ततः अग्रे क्रियापदस्य निर्माणार्थं किम् अवशिष्टम् ?

क्रियापदस्य निर्माणार्थं त्रीणि कार्याणि सन्ति—

१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा धातु–विकरणप्रत्ययोः मेलनम्
२. तिङ्प्रत्यय–सिद्धिः
३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्ययोः मेलनम्

गतकरपत्रे प्रथमं कार्यं जातम्— नाम, धातु–विकरणप्रत्ययोः मेलनेन अङ्गं निर्मितम् | द्वितीयं कार्यं किम् ? तिङ्प्रत्ययस्य सिद्धिः |

अत्र स्मर्तव्यं यत् वस्तुतः विकरणप्रत्ययस्य आगमनार्थं, तिङ्प्रत्ययः आवश्यकः एव | प्रथमं धातुः अस्ति, तदा लकारः विवक्षितः, लकारस्य स्थाने तिङ्संज्ञकप्रत्ययः आगतः, तदा एव **कर्तरि शप्** इत्यनेन विकरणप्रत्ययः आयाति | अतः प्रष्टुं शक्यते यत् तिङ्प्रत्यय–सिद्धिः द्वितीयसोपानं कथं भवितुम् अर्हति ? उत्तरम् एवम्— प्रथम–सोपानस्य कृते तिङ्प्रत्ययस्य आवश्यकता अस्ति एव, सत्यम् | मनसि एवं भवेत् | परन्तु क्रियापदस्य निर्माणार्थम् अस्माकम् अंशद्वयम् अस्ति—अङ्गं, तिङ्प्रत्ययः च | द्वयोः पृथक्–पृथक् यन्त्रागारम् अस्ति | समय–दृष्ट्या तिङ्प्रत्ययः पूर्वम् एव क्रियते | तथापि केवलं चिन्तनार्थम् अनेन क्रमेण सौकर्यम् अस्ति—प्रथमम् अङ्गं निर्मामः, तदा तिङ्प्रत्ययं साधयित्वा आनयामः | अस्माकं पृथक् यन्त्रागारे तिङ्प्रत्यय–सिद्धिः भवति, तावत् एव |

तर्हि अधुना तिङ्प्रत्ययान् साधयितुम् इच्छामः | वदति, वदतः, वदन्ति इत्येषु क्रियापदेषु "ति, तः, अन्ति" इति तिङ्प्रत्ययाः सन्ति | तेषां तिङ्–संज्ञा भवति, अतः तिङ्संज्ञकप्रत्ययाः इत्युच्यन्ते | एते च प्रत्ययाः आरम्भे स्वमूल–रूपे सन्ति | आहत्य नव प्रत्ययाः परस्मैपदिधातूनां कृते, नव प्रत्ययाः आत्मनेपदिधातूनां कृते |

परस्मैपदिधातूनां मूल–तिङ्प्रत्ययाः

तिप्	तस्	झि
सिप्	थस्	थ
मिप्	वस्	मस्

आत्मनेपदिधातूनां मूल–तिङ्प्रत्ययाः

त	आताम्	झ

थास् आथाम् ध्वम्
इङ् वहि महिङ्

एषां नाम 'तिङ्' यतोहि तिप् इत्यस्य 'ति' तः, आत्मनेपदिधातूनां कृते महिङ् इत्यस्य 'ङ्' पर्यन्तं भवन्ति | आहत्य अष्टादश मूलप्रत्ययाः सन्ति | तर्हि **ति**प् इत्यस्य 'ति' तः महि**ङ्** इत्यस्य 'ङ्' पर्यन्तम्; अतः ति + ङ् = तिङ् |

एभ्यः मूल-प्रत्ययेभ्यः दशानां लकाराणां प्रत्ययाः साध्यन्ते | एकैक-लकारस्य अष्टादश सिद्ध-प्रत्ययाः सन्ति (नव प्रत्ययाः परस्मैपदिधातूनां कृते, नव प्रत्ययाः आत्मनेपदिधातूनां कृते); एकैकस्य लकारस्य प्रत्ययाः भिन्नाः; परन्तु एषां सर्वेषां प्रत्ययानां मूलं तु एते उपरि लिखिताः अष्टादश मूलाः |

अवधेयं यत् अङ्गं द्विविधा—अदन्तम् अनदन्तं च | तदाधारेण सिद्धप्रत्ययाः अपि द्विविधा | अदन्ताङ्गानां कृते सिद्धप्रत्ययाः भवन्ति; तेभ्यः अनदन्ताङ्गानां कृते च सिद्धप्रत्ययाः किञ्चित् भिन्नाः | द्वयोः मध्ये बहुत्र साम्यम् अस्ति; कुत्रचित् एव भेदः | अधुना अस्माकम् अवधानम् अदन्ताङ्गानां सिद्ध-तिङ्प्रत्ययेषु अस्ति |

एतावता यादृशी कार्यशैली वर्णिता, सा अत्यन्तं शक्तिशालिनी | अङ्गं साधयतु अङ्गयन्त्रागारे, तदा तिङ्प्रत्ययं साधयतु प्रत्ययन्त्रागारे; तदा द्वयं मेलयतु | एवं च एकैकस्य लकारस्य कृते स्वयं यन्त्रागारं भवतु— यथा लट्-लकारे सर्वेषां द्विसहस्रस्य धातूनाम् अङ्गं क्रमेण निर्मातु, तदा सिद्धप्रत्ययैः सह मेलयतु | एवं रीत्या लट्-लकारे कस्यचिदपि नैपुण्यं भविष्यति एव |

अस्मिन् करपत्रे मूलप्रत्ययेभ्यः कथं (१) परस्मैपदि लट्-लकारस्य, तदा (२) परस्मैपदि लोट्-लकारस्य प्रत्ययाः साध्यन्ते इति द्रक्ष्यामः |

अस्य कार्यस्य कृते इत्-संज्ञाविज्ञानम् आवश्यकम् | पूर्वमपि अस्माभिः दृष्टं यत् पाणिनिना एकस्मिन् स्थले क्रमेण सर्वाणि इत्-संज्ञा-विधायक-सूत्राणि स्थापितानि (इत्-संज्ञाप्रकरणे) | तानि इत्-संज्ञा-विधायक-सूत्राणि षट् सन्ति; एकेन सूत्रेण इत्-संज्ञा निषिध्यते; अन्ते च अपरेण सूत्रेण इत्-संज्ञकः अंशः लुप्यते | सम्प्रति एषु अष्टसु सूत्रेषु सूत्रत्रयम् अपेक्षते |

हलन्त्यम् (१.३.३) = उपदेशेऽन्त्यं हलित् स्यात् | अनेन यस्य कस्यापि अंशस्य अन्ते हल्-वर्णः भवति, तस्य हल्-वर्णस्य इत्-संज्ञा भवति | धातोः अन्ते वा, प्रत्ययस्य अन्ते वा, द्वयोरपि अन्ते हलः इत्-संज्ञा भवति | यथा शप् इत्यस्मिन् प् इत्यस्य इत्-संज्ञा | णिच् इत्यस्मिन् च्, डुकृञ् इत्यस्मिन् ञ्, श्यन् इत्यस्मिन् न् |

तस्य लोपः (१.३.९) = यस्य इत्-संज्ञा जाता, तस्य लोपः भवति | यथा शप्-प्रत्यये पकारस्य इत्-संज्ञा, लोपः च |

न विभक्तौ तुस्माः (१.३.४) = धातूनां तिङ्-प्रत्ययाः, सुबन्तानाम् (इत्युक्ते नामपदानां) सुप्-प्रत्ययाः—एते सर्वे विभक्तयः इत्युच्यन्ते (**विभक्तिश्च** इति सूत्रेण) | एषां विभक्तीनां अन्ते यदि तवर्गीयः वर्णः (त्, थ्, द्, ध्, न्), सकारः, अथवा मकारः अस्ति, तर्हि इदं सूत्रं **हलन्त्यम्** इत्यस्य कार्यं बाधते | **हलन्त्यम्** इत्यनेन एषां वर्णानाम् इत्-संज्ञा भवति स्म, किन्तु **न विभक्तौ तुस्माः** इत्यनेन इत्-संज्ञा बाधिता भवति; अनेन इत्-संज्ञा न भवति | यथा सुप्-प्रत्ययाः जस्, भ्याम्, भिस्, अपि च तिङ्-

प्रत्ययाः तस्, वस्, मस्—अत्र भ्याम् इत्यस्य मकारः, तस् इत्यस्य सकारः, एषां वर्णानाम् इत्-संज्ञा भवति स्म, किन्तु न भवति | अवधेयं यत् धातुषु अस्य सूत्रस्य प्रसक्तिः नास्ति, अतः धातोः अन्ते एते वर्णाः (तवर्गीय-वर्णाः, सकारः, मकारः च) भवन्ति चेत्, तेषाम् इत्-संज्ञा भवति, लोपः भवति च |

परस्मैपदे लट्-लकारस्य तिङ्-प्रत्यय-सिद्धिः

मूलम्—
तिप् तस् झि
सिप् थस् थ
मिप् वस् मस्

तिप् – **हलन्त्यम्, तस्य लोपः** इत्याभ्यं सूत्राभ्यां पकारस्य लोपः → "ति" इति लट् प्रत्ययः निष्पन्नः |
तस् – **न विभक्तौ तुस्माः** इत्यनेन सकार-लोपः निषिध्यते → **ससजुषो रुः** इत्यनेन स्-स्थाने "रु", **खरवसानयोर्विसर्जनीयः** इत्यनेन रु-स्थाने विसर्गः | तस् → स्-लोपः निषिध्यते → स्-स्थाने रु → तरु → रु स्थाने "ः" → "तः" इति लट् प्रत्ययः निष्पन्नः |
झि – झि → झ् + इ → **झोऽन्तः** ("झ्" स्थाने अन्त् आदेशः) → अन्त् + इ → "अन्ति" इति लट् प्रत्ययः निष्पन्नः |
सिप् – **हलन्त्यम्, तस्य लोपः** इत्याभ्यं सूत्राभ्यां पकारस्य लोपः → "सि" इति लट् प्रत्ययः निष्पन्नः |
थस् – **न विभक्तौ तुस्माः** इत्यनेन सकार-लोप-निषेधः; स्-स्थाने "रु", रु-स्थाने विसर्गः | थस् → स्-लोपः निषिध्यते → स्-स्थाने रु → थरु → रु-स्थाने "ः" → "थः" इति लट् प्रत्ययः निष्पन्नः |
थ – किमपि कार्यं नास्ति | "थ" इत्येव लट् प्रत्ययः निष्पन्नः |
मिप् – **हलन्त्यम्, तस्य लोपः** इत्याभ्यां सूत्राभ्यां पकारस्य लोपः → "मि" इति लट् प्रत्ययः निष्पन्नः |
वस्, मस् – **न विभक्तौ तुस्माः** इत्यनेन सकार-लोपः निषिध्यते; स्-स्थाने "रु", रु-स्थाने विसर्गः | वस् → स्-लोपः निषिध्यते → स्-स्थाने रु → वरु → रु-स्थाने "ः" → "वः" इति लट् प्रत्ययः निष्पन्नः | तथैव अपि मस् → "मः" |

ससजुषो रुः (८.२.६६) = पदान्ते सकारस्य च सजुष्-शब्दस्य षकारस्य च स्थाने रु-आदेशो भवति | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन न केवलं यत् पदं सकारः अस्ति, अपि तु यस्य पदस्य अन्ते सकारः अस्ति | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदान्तस्य वर्णस्य स्थाने रु-आदेशः न तु पूर्णपदस्य | सश्च सजुषश्च ससजुषौ, इतरेतरद्वन्द्वः, तयोः ससजुषोः | ससजुषोः षष्ठ्यन्तं, रुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **ससजुषोः पदस्य रुः** |

विरामोऽवसानम् (१.४.११०) = वर्णानाम् अभावः अवसानसंज्ञकः | विरामः प्रथमान्तम्, अवसानं प्रथमान्तं, द्विपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णं— **विरामः अवसानम्** |

खरवसानयोर्विसर्जनीयः (८.३.१५) = पदान्तस्य रेफस्य स्थाने विसर्गो भवति खरि परे अथवा अवसानावस्थायाम् | खर् च अवसानं च (तयोरितरेतरयोगद्वन्द्वः), खरवसाने, तयोः खरवसानयोः | खरवसानयोः सप्तम्यन्तं, विसर्जनीयः प्रथमान्तं, द्विपदमिदं

सूत्रम् | **रो रि** (८.३.१४) इत्यस्मात् **रोः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन रेफान्तपदस्य न अपि तु पदान्तस्य रेफस्य स्थाने विसर्गादेशो भवति | अनुवृत्ति-सहितसूत्रं— **खरवासनयोः पदस्य रः विसर्जनीयः संहितायाम्** |

झोऽन्तः (७.१.३) = प्रत्ययस्य झकार-अवयवस्य स्थाने अन्त्-आदेशः भवति | झः षष्ठ्यन्तम्, अन्तः प्रथमान्तम्, द्विपदमिदं सूत्रम् | **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** (७.१.२) इत्यस्मात् **प्रत्ययस्य** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अङ्गस्य प्रत्ययस्य झः अन्तः** |

अतः लटि सिद्ध-प्रत्ययाः—

ति	तः	अन्ति
सि	थः	थ
मि	वः	मः

परस्मैपदे लोट्-लकारस्य तिङ्-प्रत्यय-सिद्धिः

मूलम्—

तिप्	तस्	झि
सिप्	थस्	थ
मिप्	वस्	मस्

नियमाः—

१. परस्मैपदस्य लोटः तिङ्प्रत्ययेषु यत्र इकारः दृश्यते तस्य इकारस्य स्थाने उकारः भवति |
२. "तस्, थस्, थ, मिप्" ङित्सु लकारेषु* लोटि च एतेषां प्रत्ययानां स्थाने क्रमेण "ताम्, तम्, त, अम्" एते आदेशाः |
३. लोटि मि-स्थाने नि आदेशः |
४. उत्तमपुरुषे आङ् आगमः | प्रत्ययानाम् आदौ "आ" इति युज्यते |
५. वस् मस् ङित्सु लकारेषु* लोटि च अनयोः स्थितस्य सकारस्य लोपः |
६. मध्यमपुरुषस्य सिप् प्रत्ययस्य स्थाने हि इत्यादेशः |
७. अङ्गम् अदन्तं चेत् तस्य हि-प्रत्ययस्य लोपः |
८. तिप् सिप् इत्यनयोः स्थाने विकल्पेन तात् आदेशः |

* ङित् लकाराः = ङकारः इत् येषां ते (लङ्, लिङ्, लुङ्, लृङ्) | लोट् ङिद्वत् भवति, अतः यत्र ङित्-लकाराणां सार्वत्रिकः नियमः भवति, बहुत्र लोटि अपि तस्य नियमस्य प्रसक्तिः |

तर्हि नियमान् अनुसृत्य कार्यम् एवम्—

तिप् → पकारलोपः → ति → "तु" इति लोट् प्रत्ययः निष्पन्नः |

तस् → "ताम्" इति लोट् प्रत्ययः निष्पन्नः |
झि → अन्त् + इ → अन्ति → "अन्तु" इति लोट् प्रत्ययः निष्पन्नः |
सिप् → सिप् स्थाने हि → हि लोपः → "०" अत्र किमपि न युज्यते |
थस → "तम्" इति लोट् प्रत्ययः निष्पन्नः |
थ → "त" इति लोट् प्रत्ययः निष्पन्नः |
मिप् → नि → "आनि" इति लोट् प्रत्ययः निष्पन्नः |
वस् → व → "आव" इति लोट् प्रत्ययः निष्पन्नः |
मस् → म → "आम" इति लोट् प्रत्ययः निष्पन्नः |

लोटि सिद्ध-प्रत्ययाः—

तु,	तात्	ताम्	अन्तु
०,	तात्	तम्	त
आनि		आव	आम

परस्मैपदे लोट्-लकारस्य तिङ्-प्रत्यय-सिद्धिः— सूत्राणि

लोटः तिङ्-सम्बद्ध-सूत्राणि अत्र स्थाप्यन्ते | उपरि नियमाः प्रदर्शिताः; तान् आधारीकृत्य तिङ-प्रत्ययानां कार्यम् अपि प्रदर्शितम् | तस्य कार्यस्य पृष्ठतः यानि सूत्राणि अपेक्षितानि, तानि अधः प्रतिपादितानि |

यत्र विशिष्टकार्यार्थं मूलप्रत्यये विकारः आनीयते, तत्र प्रत्ययादेशः इत्युच्यते | अष्टाध्याय्यां प्रत्ययादेशः लभ्यते केवलं द्वयोः स्थानयोः— ३.४, ७.१ च | धेयं यत् एकं सूत्रं विहाय अधस्स्थितानि सर्वाणि सूत्राणि अनयोः द्वयोः स्थानयोः सन्ति | एकं सूत्रं **अतो हेः** (६.४.१०५) अङ्गकार्यं न तु प्रत्ययादेशः, अतः षष्ठाध्यये | पुनः ३.४, ७.१-मध्ये एकं सूत्रं विहाय अवशिष्टानि सर्वाणि ३.४-मध्ये सन्ति | ३.४-मध्ये **लस्य** (३.४.७७) इत्यस्य अधिकारः | लस्य इत्यस्य अधिकारः ३.४.७७ – ३.४.११२ यावत् | दश लकाराः सन्ति; अनुबन्धलोपानन्तरं सर्वेषां दशानां 'ल्' इत्येव अवशिष्यते | **लस्य** इति सूत्रं तस्य 'ल्' इत्यस्य एव षष्ठ्यन्तं रूपम् (अकारः उच्चारणार्थः) |

नियमाः—
१. परस्मैपदस्य मूल-तिङ्प्रत्ययेषु यत्र इकारः दृश्यते तस्य इकारस्य स्थाने उकारः भवति |

एरुः (३.४.८६) = लोट्-लकार-सम्बद्ध-इकारस्य स्थाने उकारादेशः भवति | लोट इकारस्य उः | एः षष्ठ्यन्तं, उः प्रथमान्तं, द्विपदमिदं सूत्रम् | **लोटो लङ्वत्** (३.४.८५) इत्यस्मात् सूत्रात् **लोटः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **लोटः लस्य एः उः** |

२. "तस्, थस्, थ, मिप्" ङित्सु लकारेषु लोटि च एतेषां प्रत्ययानां स्थाने क्रमेण "ताम्, तम्, त, अम्" एते आदेशाः |

तस्थस्थमिपां तान्तन्तामः (३.४.१०१) = "तस्, थस्, थ, मिप्" ङित्सु लकारेषु एतेषां प्रत्ययानां स्थाने क्रमेण "ताम्, तम्, त, अम्" एते आदेशाः | तश्च थश्च थ च मिप् च तेषामितरेतरद्वन्द्वः तस्थस्थमिपः, तेषां तस्थस्थमिपाम् | ताम् च तम् च त च अम् च तेषामितरेतरद्वन्द्वः तान्तन्तामः | तस्थस्थमिपां षष्ठ्यन्तं, तान्तन्तामः प्रथमान्तं, द्विपदमिदं सूत्रम् | **नित्यं ङितः** (३.४.९९) इत्यस्मात् **ङितः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ङितः लस्य तस्थस्थमिपां तान्तन्तामः** |

लोटो लङ्वत् (३.४.८५) = प्रत्ययादेशानां कृते लोट्-लकारः लङ् इव भवति | अतिदेशसूत्रम् | लोटः षष्ठ्यन्तं, लङ्वत् अव्ययं, द्विपदमिदं सूत्रम् | कानिचन कार्याणि केवलं ङित्सु भवन्ति | लोट् टित् न तु ङित्, अतः यत्र ङित्सु किञ्चन कार्यं भवति, "ङित्सु भवतु" इत्यनेन तर्केण लोटि तत्कार्यं नार्हम् | अनेन सूत्रेण लोटः कृते इदं कार्यं सिद्धम् | सूत्रं स्वयं सम्पूर्णम्— **लोटः लङ्वत्** |

अत्र 'लङ्वत्' ङिद्वत् इत्यर्थे एव दत्तं; ङित्सु लकारेषु लङ् अन्तर्भवति अतः लङ् ङितः 'उपलक्षणम्'; उदाहरणरूपेण, प्रतिनिधिरूपेण ङित्-स्थाने लङ् स्वीक्रियते | अतः ङिद्वत् इत्येव वक्तुं शक्यते, न कोऽपि भेदः | यतोहि यत् किमपि कार्यं भवति ङित्सु, तत्कार्यं लङि अपि भवति यतः लङ् ङित् |

अग्रे तर्हि लोट् लङ्वत् इति चेत्, पाणिनिना किमर्थं लोट् टित् कृतं न तु साक्षात् ङित् ? कुतः लोट्-स्थाने नामकरणं 'लोङ्' न स्यात् ? उत्तरम् अस्ति यत् टित्सु लकारेषु यानि कार्याणि भवन्ति, तानि अपि अपेक्षितानि भवन्ति लोटि | यथा आत्मनेपदे **टित आत्मनेपदानां टेरे** (३.४.७९) इति सूत्रेण टित्सु लकारेषु विशिष्टकार्यं वक्ष्यमाणं; तत् कार्यमपि अपेक्षितं लोटि | लोट् 'लोङ्' यदि स्यात्, तर्हि एतादृशानि कार्याणि लोटि न स्युः |

कानिचन च कार्याणि भवन्ति लङि यानि न अपेक्षितानि लोटि | आहत्य सप्तसु स्थलेषु लङि तिङ्-आदेशाः सन्ति—

१) **नित्यं ङितः** (३.४.९९) = ङितः लकारस्य सकारान्त-उत्तमपुरुष-प्रत्ययस्य अन्त्यसकार-लोपो भवति |
२-५) **तस्थस्थमिपां तान्तन्तामः** (३.४.१०१) = "तस्, थस्, थ, मिप्" ङित्सु लकारेषु एतेषां प्रत्ययानां स्थाने क्रमेण "ताम्, तम्, त, अम्" एते आदेशाः |
६) **इतश्च** (३.४.१००) = ङित्-लकारस्य स्थाने यः परस्मैपद-ह्रस्व-इकारान्त-तिङ्प्रत्ययः, तस्य अन्त्य-इकारस्य लोपो भवति |
७) **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९), **लङः शाकटायनस्यैव** (३.४.१११) इति सूत्राभ्यां लङि कुत्रचित् झि-स्थानि जुस्-आदेशः |

एषु सप्तसु स्थलेषु लोटः प्रसङ्गः भवति चतुर्षु स्थलेषु— **नित्यं ङितः** (३.४.९९) इत्यनेन स्-लोपः वसि मसि च; **तस्थस्थमिपां तान्तन्तामः** (३.४.१०१) इत्यनेन तसः ताम्, थसः तम्, थ-स्थाने त च | मिपः अम् बाधितं भवति **मेर्निः** (३.४.८९) इत्यनेन; **इतश्च** (३.४.१००) बाधितं भवति **एरुः** (३.४.८६) इत्यनेन; **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९), **लङः शाकटायनस्यैव** (३.४.१११) इत्यनयोः जुस्-आदेशः कथं न भवति लोटि इत्यस्मिन् विषये महती चर्चा | केचन वदन्ति यत् **विदो लटो वा** (३.४.८३) इत्यस्मात् **वा** इत्यस्य अनुवृत्तिः अनयोः सूत्रयोः येन लोटि अप्रसक्तेः अनुमतिः स्यात्; अन्ये वदन्ति यत् लङ्वत्

इत्यस्मिन् वति–प्रत्ययः 'न नित्यः'; 'वतिपदघटितम् अनित्यम्' इति प्रसिद्धवाक्यम् | अत्र 'न नित्यः' इत्यस्य सारांशः एवं यत् लोटि लङः स्वभावः अध्यारोप्यते, किन्तु लक्ष्यम् अधिकृत्य— यत्र फलं नापेक्षते, तत्र प्रसक्तिः न भवति | अतः **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९), **लङः शाकटायनस्यैव** (३.४.१११) इति सूत्राभ्यां कार्यं भवति लङि किन्तु लोटि न अपेक्षते, अतः 'लङ्वत्' इति तत्र न गच्छति |

३. लोटि अम् स्थाने नि आदेशः |

मेर्निः (३.४.८९) = लोट्–लकारे मि इत्यस्य स्थाने नि–आदेशो भवति | मेः षष्ठ्यन्तं, निः प्रथमान्तं, द्विपदमिदं सूत्रम् | **लोटो लङ्वत्** (३.४.८५) इत्यस्मात् सूत्रात् **लोटः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **लोटः लस्य मेः निः** |

४. उत्तमपुरुषे आड् आगमः | प्रत्ययानाम् आदौ "आ" इति युज्यते | पित्त्वम् आरोपितम् |

आडुत्तमस्य पिच्च (३.४.९२) = लोट्–लकारस्य लस्य स्थाने यः उत्तमपुरुष–प्रत्ययः भवति, तस्य आट्–आगमो भवति, अपि च तस्य पित्त्वं भवति | **आद्यन्तौ टकितौ** इत्यनेन आट्–आगमः प्रत्ययात् प्राक् आयाति | आड् प्रथमान्तम्, उत्तमस्य षष्ठ्यन्तं, पित् प्रथमान्तं, च अव्ययपदम्, अनेकपदमिदं सूत्रम् | **लोटो लङ्वत्** (३.४.८५) इत्यस्मात् सूत्रात् **लोटः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **लोटः लस्य उत्तमस्य आट् पित् च** |

५. वस् मस् ङित्सु लकारेषु लोटि च अनयोः स्थितस्य सकारस्य लोपः |

नित्यं ङितः (३.४.९९) = ङितः लकारस्य सकारान्त–उत्तमपुरुष–प्रत्ययस्य अन्त्यसकार–लोपो भवति | **येन विधिस्तदन्तस्य** (१.१.७७) इत्यनेन तादृशः उत्तमपुरुषप्रत्ययः यस्य अन्ते सकारः स्यात् | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्त्यस्य सकारस्य एव लोपो भवति, न तु पूर्णतया प्रत्ययस्य | नित्यं द्वितीयान्तं क्रियाविशेषणं, ङितः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **स उत्तमस्य** (३.४.९८) इति सूत्रस्य पूर्णतया अनुवृत्तिः; **इतश्च लोपः परस्मैपदेषु** (३.४.९७) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ङितः लस्य सः उत्तमस्य नित्यं लोपः** |

६. मध्यमपुरुषस्य सिप् प्रत्ययस्य स्थाने हि इत्यादेशः | अपित्त्वम् आरोपितम् |

सेर्ह्यपिच्च (३.४.८७) = लोट्–लकारस्य सि इत्यस्य स्थाने हि–आदेशो भवति; स च हि अपित् भवति | सेः षष्ठ्यन्तं, हिः प्रथमान्तम्, अपित् प्रथमान्तं, च अव्ययपदम्, अनेकपदमिदं सूत्रम् | **लोटो लङ्वत्** (३.४.८५) इत्यस्मात् **लोटः** इत्यस्य अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **लोटः लस्य सेः हि अपित् च** |

७. अङ्गम् अदन्तं चेत् तस्य हि–प्रत्ययस्य लोपः |

अतो हेः (६.४.१०५) = ह्रस्व–अकारात् अङ्गात् परस्य हि इत्यस्य लुक् (लोपः) भवति | अतः पञ्चम्यन्तं, हेः षष्ठ्यन्तं,

द्विपदमिदं सूत्रम् | **चिणो लुक्** (६.४.१०४) इत्यस्मात् **लुक्** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः (अत्र **अङ्गात्** भवति विभक्तिपरिणाम इति सिद्धान्तेन) | अनुवृत्ति-सहितसूत्रम्— **अतः अङ्गात् हेः लुक्** |

लोटि नवसु सिद्ध-तिङ्प्रत्ययेषु हि-प्रत्ययः एक एव यस्य रूपं परिवर्तते अङ्गम् अदन्तम् अनदन्तं चेति अवलम्ब्य |

८. तिप् सिप् इत्यनयोः स्थाने विकल्पेन तात् आदेशः |

तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् (७.१.३५) = तु हि इत्यनयोः स्थाने विकल्पेन तात् आदेशः भवति आशीर्वादार्थे | **ङ्मो ह्रस्वादचि ङ्मुण् नित्यम्** (८.३.३२) इत्यनेन प्रकृतसूत्रे तातङ् इति पदात् ङुट्-आगमः | तुश्च हिश्च तयोरितरेतरद्वन्द्वः तुही, तयोः तुह्योः | तुह्योः षष्ठ्यन्तं, तातङ् प्रथमान्तम्, आशिषि सप्तम्यन्तम्, अन्यतरस्यां सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अङ्गस्य तुह्योः तातङ् आशिषि अन्यतरस्याम्** |

Bonus

अत्र प्रश्नः उदेति अयं तातङ्-आदेशः कस्य स्थाने आयाति ?

1. यः कोऽपि आदेशः, सः कस्य स्थाने आयाति इत्यस्य निर्णयार्थं सामान्यसूत्रं भवति **अलोऽन्त्यस्य** (१.१.५२) | अनेन, आदेशः स्थानिनः अन्त्यस्य अलः स्थाने भवति | अयम् अन्तादेशः इत्युच्यते—

अलोऽन्त्यस्य (१.१.५२) = षष्ठीविभक्ति-द्वारा यस्य पदस्य स्थाने आदेशः प्राप्तः, सः आदेशः अन्त्यस्य अल्-वर्णस्य स्थाने भवति | परिभाषासूत्रम् | अलः षष्ठ्यन्तम्, अन्त्यस्य षष्ठ्यन्तम्, द्विपदमिदं सूत्रम् | **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्मात् **षष्ठी**, **स्थाने** इत्यनयोः अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **षष्ठ्या अन्त्यस्य अलः स्थाने** (विद्यमानः आदेशः) |

यथा—

सार्वधातुकार्धधातुकयोः (७.३.८४) = सार्वधातुके आर्धधातुके च प्रत्यये परे इगन्ताङ्गस्य इकः गुणः भवति | सार्वधातुकञ्च आर्धधातुकञ्च तयोरितरेतरद्वन्द्वः सार्वधातुकार्धधातुके, तयोः सार्वधातुकार्धधातुकयोः | सार्वधातुकार्धधातुकयोः सप्तम्यन्तम्, एकपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा-सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन '**इकः अङ्गस्य**' इत्युक्ते न केवलम् इक् इति अङ्गं, किन्तु तादृशम् अङ्गं यस्य अन्ते इक्; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गस्य स्थाने गुणादेशः इति न, अपि तु अङ्गस्य अन्तिमवर्णस्य स्थाने गुणादेशः | अनुवृत्ति-सहितसूत्रम्— **इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः** |

भू + शप् इति स्थितौ चिन्तयतु | अनुवृत्ति-सहितसूत्रे '**अङ्गस्य गुणः**' इत्यनेन सर्वस्य अङ्गस्य स्थाने गुणादेशः स्यात् | किन्तु **अलोऽन्त्यस्य** (१.१.५२) इति परिभाषासूत्रस्य साहाय्येन तथा न भवति—

भू + शप् → भू + अ → **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तादेशः → भो + अ → भव

2. किन्तु आदेशे एकस्मात् अधिकाः वर्णाः सन्ति चेत्, **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन पूर्णस्थानिनः स्थाने भवति—

अनेकाल्शित् सर्वस्य (१.१.५५) = आदेशः अनेकाल् (आदेशे एक एव वर्णः न अपि तु अनेके वर्णाः) अथवा शित् चेत्, सर्वस्थानिनः स्थाने भवति (न तु अन्त्यवर्णस्य) | (यस्य स्थाने आदेशः आदिष्टः, सः स्थानी |) इदं सूत्रम् **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | न एकः अनेकः नञ्तत्पुरुषः; अनेकः अल् यस्य सः अनेकाल् बहुव्रीहिः; शकारः इत् यस्य सः शित् बहुव्रीहिः; अनेकाल् च शित् च अनेकाल्शित् समाहारद्वन्द्वः | अनेकाल् प्रथमान्तं, शित् प्रथमान्तं, सर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अनेकाल्शित् सर्वस्य स्थाने** |

यथा—

ज्ञाजनोर्जा (७.३.७९) = ज्ञा (क्र्यादिगणे), जन् (दिवादिगणे) चेत्यनयोः जा–आदेशो भवति शिति प्रत्यये परे | आदेशः अनेकाल् अतः **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन आदेशः सर्वस्थानिनः स्थाने भवति (न तु अन्त्यवर्णस्य) | ज्ञाश्च जन् च तयोरितरेतरद्वन्द्वः ज्ञाजनौ, तयोः ज्ञाजनोः | ज्ञाजनोः षष्ठ्यन्तं, जा लुप्तप्रथमाकं पदं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृतिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ज्ञाजनोः अङ्गस्य जा शिति** |

जन्–धातुः आत्मनेपदी—

जनीँ → अनुबन्धलोपे जन् → जन् + श्यन् → **ज्ञाजनोर्जा** (७.३.७९) इत्यनेन शिति परे जा–आदेशः, **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन स च सर्वादेशः → जा + य → जाय इति अङ्गम् → जाय + ते → जायते

3. अधुना स च अनेकाल् आदेशः ङित् चेत्, अनेकाल् चेदपि अन्त्यस्य एव स्थाने भवति—

ङिच्च (१.१.५३) = ङित्–आदेशः अनेकाल् चेदपि अन्त्यस्य एव स्थाने भवति | इदं सूत्रम् **अनेकाल्शित् सर्वस्य** (१.१.५५) इति सूत्रस्य अपवादः; **अनेकाल्शित् सर्वस्य** (१.१.५५) तु **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | ङकारः इत यस्य सः ङित्, बहुव्रीहिः | ङित् प्रथमान्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्मात् **अलः**, **अन्त्यस्य** इत्यनयोः अनुवृत्तिः | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **ङिच् च अन्त्यस्य अलः स्थाने** |

यथा—

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७) = श्नुप्रत्ययान्ताङ्गस्य (स्वादिगणस्य अङ्गस्य यथा शक्नु, चिनु इत्यनयोः),

इकारान्त–उकारान्तधातुरूपि–अङ्गस्य, भ्रू–प्रातिपदिकस्य च— एषाम् इकारस्य उकारस्य स्थाने क्रमेण इयङ् उवङ् च आदेशः भवति अजादि–प्रत्यये परे | अनुवृत्ति–सहितसूत्रम्— **य्वोः श्नुधातुभ्रुवाम् अङ्गानां इयङुवङौ अचि** |

तुदादिगणे श इति विकरणप्रत्ययः, अनुबन्धलोपे 'अ' इति अजादि–प्रत्ययः | रि गतौ इति इकारान्त–धातुः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन अचि परे इकारान्त–धातूनाम् इयङ्–आदेशः | इयङ् इति आदेशः अनेकाल्, किन्तु ङित् अपि अस्ति अतः **ङिच्च** (१.१.५३) इति सूत्रेण अन्तादेशः |

तुदादिगणे रि गतौ → रि + श → रि + अ → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन अचि परे इयङ्–आदेशः, **ङिच्च** (१.१.५३) इत्यनेन स च अन्तादेशः → र् + इय् + अ → रिय इति अङ्गम् → रिय + ति → रियति

वैशिष्ट्यम् अत्र इदं यत् इयङ्–आदेशे ङित् इत्यस्य अन्यत् किमपि कार्यं नास्ति | ङित्त्वात् अन्तादेशः इत्येव प्रयोजनम् |

4. अधुना तातङ्–आदेशः अपि अनेकाल्, ङित् च | अतः नियमानुसृत्य **ङिच्च** (१.१.५३) इत्यनेन अन्तादेशः— अन्त्यस्य अलः स्थाने स्यात् | यथा तिप् → तु → **तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्** (७.१.३५), **ङिच्च** (१.१.५३) इत्यनेन उकारस्य स्थाने तातङ् → त् + तात् |

किन्तु एवं भवति चेत्, सिद्धं रूपं 'त्तात्'; तत् तु इष्टं रूपं नास्ति | इष्टम् अस्ति तात्, नाम तु–स्थाने सर्वादेशः | तदर्थम् **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन कार्यं स्यात् | परन्तु तातङ् ङित्— तस्मात् इष्ट–सूत्रेण कार्यं कथं साधयितुं शक्येत ?

समाधानं सिद्धान्तकौमुद्याः मूलवृत्तौ प्राप्यते—

"आशिषि तुह्योस्तातङ् वा स्यात् | अनेकाल्त्वात्सर्वादेशः। यद्यपि **ङिच्च** इत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते | इहोत्सर्गापवादयोरपि समबलत्वात् | भवतात् |"

'यद्यपि **ङिच्च** इत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थः'— अस्य अर्थः एवं यत् यद्यपि **ङिच्च** (१.१.५३) इति अपवादभूत–सूत्रेण तातङ् ङित्त्वात् अन्त्यस्य अलः स्थाने स्यात्, तथापि इदं सूत्रं **ङिच्च** (१.१.५३) 'अनन्यार्थङित्त्वेष्वनङादिषु चरितार्थः' | नाम, येषाम् आदेशानां ङित्त्वस्य एकम् एव प्रयोजनम् 'अन्तादेशः', तेषां द्वारा **ङिच्च** (१.१.५३) इति सूत्रस्य साफल्यम् | तेषु अनन्य–अर्थ–ङित्त्वेषु अनङादिषु **ङिच्च** (१.१.५३) इति सूत्रस्य अर्थः पूरितः |

अत्र सिद्धान्तकौमुदी–वृत्तौ अनङ् इत्यादेशस्य दृष्टान्तः दीयते | अनङ् अपि अनेकाल्–आदेशः, ङित् च |

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः (७.१.७५) = तृतीयादि–अजादि–विभक्तिषु परेषु अस्थि, दधि, सक्थि, अक्षि च एषां शब्दानाम् अनङ्–आदेशो भवति |

तृतीयाविभक्तौ दधि + टा-प्रत्ययः → दधि + आ → **अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः** (७.१.७५) इत्यनेन अनङ्-आदेशः, **ङिच्च** (१.१.५३) इत्यनेन अन्तादेशः → दध् + अन् + आ → दधन् + आ → **अल्लोपोऽनः** (६.४.१३४) इत्यनेन सर्वनामस्थानभिन्न-यकारादौ अजादौ च स्वादि-प्रत्यये परे अङ्गस्य अन्-अवयवस्य अकार-लोपः → दध्न् + आ → दध्ना

एवमेव सर्वेषु सर्वनामस्थानभिन्नेषु अजादिषु स्वादिषु प्रत्ययेषु तथा भवति | दधि + ए → दधन् + ए → दध्ने | दधि + अस् → दधन् + अस् → दध्नः | दधि + ओस् → दध्नोः | दधि + आम् → दध्नाम् |

सु	औ	जस्	स्	औ	अस्
अम्	औट्	शस्	अम्	औ	अस्
टा	भ्याम्	भिस्	आ	भ्याम्	भिस्
ङे	भ्याम्	भ्यस्	ए	भ्याम्	भ्यस्
ङसि	भ्याम्	भ्यस्	अस्	भ्याम्	भ्यस्
ङस्	ओस्	आम्	अस्	ओस्	अम्
ङि	ओस्	सुप्	इ	ओस्	सु

तर्हि वृत्तौ टीकाकारः अनङ्-आदेशस्य उदाहरणम् अददत् किमर्थम् ? अनङ्-आदेशः दधि-शब्दस्य इकारस्य एव स्थाने आयाति न तु पूर्णस्य दधि-शब्दस्य, यतोहि अनङ् यद्यपि अनेकाल्, तथापि ङित् अस्ति अपि च तस्य ङित्त्वस्य अन्यत् किमपि प्रयोजनं नास्ति | एतादृशैः आदेशैः **ङिच्च** (१.१.५३) इति सूत्रस्य अपवादबलं पूरितम् |

किन्तु क्वचित् कस्यचित् आदेशस्य ङित्त्वस्य अनेकानि प्रयोजनानि सन्ति | यथा तातङ्-प्रत्ययः, तस्य विद्यमानस्य ङित्त्वस्य चत्वारि प्रयोजनानि सन्ति **ङिच्च** इति सूत्रं विहाय |

१. प्रथमं प्रयोजनं गुण-निषेधः | द्विष् इति परस्मैपदिधातुः अदादिगणे, तत्र च विकरणप्रत्ययस्य लुक् (लोपः) | द्विष् + तातङ् | तातङ् तु-प्रत्ययस्य स्थाने आगतः अपि च तु-प्रत्ययः पित् इत्यस्मात् आगतः; अनेन तातङ् इत्यस्यापि पित्त्वं; पित्त्वात् गुणः भवेत् | द्विष्-धातोः उपधायां यः लघु-इकारः, तस्य गुणः प्राप्तः **पुगन्तलघूपधस्य च** (७.३.८६) इति सूत्रेण | किन्तु तातङ् ङित्, अतः **क्ङिति च** (१.१.५) इति सूत्रेण गुण-निषेधः, द्विष् + तातङ् → द्विष्टात् |

२. द्वितीयं प्रयोजनं वृद्धि-निषेधः | वृद्धिविषये स्तु-धातुः अदादिगणे | स्तु + तात् इति स्थितौ **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यनेन **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रं प्रबाध्य वृद्धिम् आदिशति | परन्तु तातङ् ङित्, अतः **क्ङिति च** (१.१.५) इति सूत्रेण वृद्धि-निषेधः, स्तु + तातङ् → स्तुतात् |

३. तृतीयं ङित्त्वनिमित्तकं कार्यं सम्प्रसारणम् | अग्रे अस्माभिः बहुत्र सम्प्रसारणकार्यं परिशीलयिष्यते | अधुना केवलं बोध्यं यत् कुत्रचित् यण्-सन्धेः विपरीतत्वेन कार्यं भवति | सम्प्रसारणं भवति ङित्त्वेन कित्त्वेन च | यथा ग्रह्-धातुतः क्तवतौ, प्रत्ययस्य कित्त्वात् ग्रह् → गृह्, अनेन गृहीतवान् | तथैव वस्-धातोः क्तवतौ वस् → उस्, अनेन उषितवान् | अत्र प्रकृतौ, अदादिगणे वश् इत्यपि सम्प्रसारणिधातुः | वश् + तातङ् → ङित्त्वात् सम्प्रसारणम् → उष्टात् |

४. चतुर्थं प्रयोजनं ईट्–आगम–निषेधः | **ब्रुव ईट्** (७.३.९३) इत्यनेन ब्रू–धातुतः हलादि–पित्–प्रत्ययस्य ईट्–आगमो भवति | यथा ब्रू + तिप् → ब्रू + ति → ब्रू + ईट् + ति → ब्रू + ईति → ब्रो + ईति → ब्र् + अव् + ईति → ब्रवीति | तातङ् अपि हलादिः, अपि च तु–स्थाने आयाति इति कृत्वा पित्त्वं विधीयते | किन्तु ङित्त्वात् पित्त्वं न मन्यते— प्रामाण्येन महाभाष्ये वाक्यम् अस्ति 'ङिच्च पिन्न, पिच्च ङिन्न' | तस्मात् अत्र पित्त्वाभावे **ब्रुव ईट्** (७.३.९३) इत्यस्य प्रसक्तिर्नास्ति | ङित्त्वात् अत्र गुणनिषेधः अपि अस्ति | ब्रू + तात् → ब्रूतात् |

'गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते' | गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया—अत्र गुण–वृद्धि–निषेधः, सम्प्रसारण–आद्यर्थता, तया | तातङि ङित्त्वस्य विभिन्नानि प्रयोजनानि सन्ति, तेषां प्रभावेन— तेषां प्रभावेन अग्रे उच्यते किं भवति | 'सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः'— 'सम्भवत्प्रयोजनङकारे' इत्युक्तौ यस्य ङकारस्य सम्भावितप्रयोजनानि, विभिन्नप्रयोजनानि | अनङ्–आदेशे ङित्त्वस्य अनन्यप्रयोजनम् | न विद्यते अन्यत्प्रयोजनं यस्य, तदनन्यप्रयोजनम् | तातङ्–आदेशस्य ङित्त्वस्य विभिन्नप्रयोजनानि— सम्भवन्ति प्रयोजनानि अन्यान्यापि यस्य सः सम्भवत्प्रयोजनः | तादृशङकारयुक्तादेशे तातङि **ङिच्च** (१.१.५३) इति सूत्रं प्रति शिथिलता, मन्थरगतिः आयाति |

'इहोत्सर्गापवादयोरपि समबलत्वात्'— अत्र उत्सर्गस्य अपवादस्य च समबलं भवति | अनेन तातङि ङित्त्वस्य **ङिच्च** (१.१.५३) इति सूत्रं प्रति अपवादबलं न निर्वहति | तस्मात् **ङिच्च** (१.१.५३) इति अपवादभूतसूत्रं 'परेण बाध्यते'— सामान्यसूत्रेण बाध्यते |

विविधकार्यैः तातङः विषये मन्दगत्या प्रवृत्तिः भवति | यथा कश्चन लोकन्यायः अस्ति यत् यः बुभुक्षितः तस्य शीघ्रमेव भोजनस्य विषये प्रवृत्तिः भवति | यः तस्मिन् एव क्षणे खादितवान्, उदरं पूरितं, तस्य भोजनविषये, प्रवृत्तौ मन्थरगतिः आयाति | एवमेव तातङः ङित्त्वस्य अनेकानि कार्याणि अभवन् एव, यस्मात् **ङिच्च** (१.१.५३) प्रति तादृशी प्रवृत्तिः नास्ति, अतः अपवादत्वस्य बलं नश्यति |

अधुना यदा अपवादस्य बलं नास्ति, तदा पूर्वपरत्वं परिशीलनीयं भवति | **ङिच्च** (१.१.५३), **अनेकाल्शित् सर्वस्य** (१.१.५५) इति सूत्रद्वयमपि सपादसप्ताध्याय्याम् अतः **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यस्य परत्वात् बलम् | तदर्थं च सिद्धान्तकौमुद्याम् उच्यते, "इहोत्सर्गापवादयोरपि समबलत्वात् | भवतात् |" एतस्मात् तातङ् **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन न केवलम् उकारस्य अपि तु तु–प्रत्ययस्य पूर्णतया स्थाने आयाति |

Swarup March 2013 (Updated March 2015, Sept 2016)